इति [1]किम् ? गां ददाति । अश्वं ददाति । कारकात् इति किम् ? बहूनां स्वामी । अल्पानां स्वामी । अर्थग्रहणात् पर्यायेभ्योऽपि भवति । भूरिशो ददाति । स्तोकशो ददाति ।

[६३३] बह्वल्पार्थान् मङ्गलामङ्गलवचनम् । (म. भा. २. ४३६)

यत्र मङ्गलं गम्यते तत्रायं प्रत्यय इष्यते । बहुशो ददाति इति आभ्युदयिकेषु कर्मसु । अल्पशो ददाति इति अनिष्टेषु [2]कर्मसु ॥

## सङ्ख्यैकवचनाच्च वीप्सायाम् । (४३/२११०)

सङ्ख्यावाचिभ्यः प्रातिपदिकेभ्यः एकवचनाच्च च[3] वीप्सायां [4]द्योत्यायां शस्प्रत्ययो भवति अन्यतरस्याम् । द्वौ द्वौ [5]मोदकौ ददाति द्विशः[6] । त्रिशः[7] । एकवचनात् खल्वपि – कार्षापणं कार्षापणं [8]ददाति कार्षापणशः[9] । माषशः[10] । पादशो ददाति[11] । एकोऽर्थ उच्यते येन तदेकवचनम् । कार्षापणादयश्च परिमाणशब्दाः वृत्तावेकार्था एव भवन्ति । सङ्ख्यैकवचनात् इति किम् ? घटं घटं ददाति । वीप्सायाम् इति किम् ? द्वौ ददाति । कार्षापणं ददाति । कारकात् इत्येव, द्वयोर्द्वयोः स्वामी । कार्षापणस्य कार्षापणस्य स्वामी ॥

## प्रतियोगे पञ्चम्यास्तसिः । (४४/२१११)

प्रतिना [12]कर्मप्रवचनीयेन योगे या पञ्चमी विहिता तदन्तात्[13] तसिः प्रत्ययो भवति । प्रद्युम्नो वासुदेवतः प्रति । अभिमन्युरर्जुनतः प्रति । वाग्रहणानुवृत्ते[14]र्विकल्पेन भवति । वासुदेवादर्जुनादित्यपि [15]भवति ।

[६३४] तसिप्रकरण आद्यादिभ्य उपसङ्ख्यानम् ।

आदौ आदितः[16] । मध्यतः । पार्श्वतः । पृष्ठतः । [17]आकृतिगणश्चायम् ॥

## अपादाने चाहीयरुहोः । (४५/२११२)

अपादाने या पञ्चमी [18]तस्याः पञ्चम्याः वा तसिः प्रत्ययो भवति, तच्चेद् अपादानं हीयरुहोः सम्बन्धि न भवति । ग्रामतः आगच्छति, ग्रामात् । चोरतः बिभेति, चोरात्[19] । अध्ययनतः पराजयते, अध्ययनात्[20] । अहीयरुहोः इति किम् ? सार्थाद् हीयते । पर्वतादवरोहति । [21]हीयते इति विकारनिर्देशो जहातेः प्रतिपत्त्यर्थः, जिहीतेर्मा भूत्, भूमित उज्जिहीते, भूमेरुज्जिहीते । कथं 'मन्त्रो हीनः स्वरतो वर्णतो वा' (पा. शि. ५२) इति । नैषा पञ्चमी । किं तर्हि, तृतीया । स्वरेण वर्णेन वा हीनः [22]इत्यर्थः ॥

---

1. किम् नास्ति क. 2. कर्मसु नास्ति क. 3. कारकात् इत्यधिकम् ब. ड. 4. गम्यमानायां क. 5. मोदकौ नास्ति क. 6. ददाति इत्यधिकम् क. फ. 7. ददाति इत्यधिकम् क. 8. ददाति नास्ति ब. ड. 9. ददाति इत्यधिकम् क. 10. कुडवशः इत्यधिकम् क. 11. कुण्डशो ददाति । प्रस्थशो ददाति इत्यधिकम् ड. 12. कर्मप्रवचनीयेषु ग. 13. प्रातिपदिकात् इत्यधिकम् क. 14. विकल्पोऽपि भवति ह. 15. भवति नास्ति क. 16. अग्रतः अन्ततः इत्यधिकम् क. ह, अन्ततः इत्यधिकम् ड. 17. आकृतिगणोऽयम् क. 18. तदन्तात् क. 19. बिभेति इत्यधिकम् क. 20. पराजयते इत्यधिकम् क. 21. हीय ड. 22. इति ह.